हारीतोमद्गुःकारण्डवःप्लवः। तित्तिरिःकुक्कुभोलावोजीवञ्जीवश्चकोरकः। कोयष्टिःटिट्टिभःकोकःक्रकरोवर्त्तिकादयः।

नभसागच्छतिनभसंगमः। गमेःसुप्युपसंख्यानात्खच्। वासंयमपुरंदरोवाचितिचकारादमागमः। अन्यविचमितमिरमिलनिमिनिनिपरिपति
भ्यो सङितिनभसशब्दोऽस्तीत्येके। पतंगोनानार्था। एतेपक्षिविशेषाः। हरितोवर्णमितिहारीतः। मज्जतिमद्गुः। जलकाकः। कपोतादिःकारं
डवःकारंडः। पंजरखंधवासिकारण्डवः। प्लवतेप्लवः। तित्तिरिशब्दंरातितित्तिरिः। कक्कुशब्दंकरोतिकक्कुभः। लातिलूयतेवालावः। जीवनस
ह्वराणिजीवतिजीवञ्जीवः। वाक्जनकाद्युवच्। चकतेन्यायपाहूय्यतिचकोरः। चकोरकः। कायष्टिः। शिखरीशिटीटीतिशब्दंभाषतेटिट्टिभः। राम
कुकविकोकः। केतिकरोतीतिक्रकरः। वर्त्ततइतिवर्त्तकः। शकुनोसाधुः। प्रावामितिपक्षेवर्त्तिका। आदिशब्दात्कपिंजलादयः॥ ४९

गिरतिखंगरुत्। पक्षपरिग्रहे। छाद्यतेऽनेनांगं छदः। छादेर्घेद्व्युपसर्गस्य। पतत्यनेनपत्त्रं। पतनेनत्रायतेपतत्त्रं। मूलेपक्षादिभ्यःतिः। चंचतिचलतिचंचुः
त्रायतेत्रोटिः। तुडुवा। प्रडीनंप्रकर्षेणसहतंचडयनं। स्वादयन्नोदितइतिनिष्ठानत्वं। एताइतिङिडीनाद्युपलक्षणार्थं। पेशीनांमांसखंडानांसं
घः। गोडागारः। अमतिनिस्सरत्यस्मादण्डं। निस्वःसेद्धाइतिगोडः। कौलीयतेकुल्यतेकुलमेतिवा। कुलायः। निलीयतेऽस्मिन्नीडं। पुनाति
पोतः। पात्येनंपिवतिस्तनौवापाकः। अभ्यतेऽर्भकः। डयतिडिम्भः। प्रथतेवर्द्धतेपृथुकः। पृथुकः। शपतिशवतिवाशावः
कः। शिनोतिस्नेहेनशेतेवा। त्यथीशिशुः। स्त्रीचपुमांश्चस्त्रीपुंसौ। अचतुरविचतुरेतिसाधुः। मिथ्यतेसंगच्छतेमिथुनं। मिथृमेधृसंगमने। द्वं

गरुत्पक्षच्छदाःपत्त्रंपतत्त्रंचतनूरुहं॥३६॥ स्त्रीपक्षतिःपक्षमूलंचंचुस्त्रोटिरुभेस्त्रियौ। प्रडीनोड्डीनसंडीनान्येताः
खगगतिक्रियाः॥३७॥ पेशीकोशोद्विहीनेऽण्डंकुलायोनीडमस्त्रियां। पोतःपाकोऽर्भकोडिम्भःपृथुकःशावकःशिशुः
॥३८॥ स्त्रीपुंसौमिथुनंद्वन्द्वंयुग्मंतुयुगलंयुगं। समूहेनिवहव्यूहसंदोहविसरव्रजाः॥३९॥ स्तोमौघनिकरव्रात
वारसंघातसंचयाः। समुदायःसमुदयःसमवायश्चयोगणाः॥४०॥ स्त्रियांतुसंहतिर्वृन्दंनिकुरम्बंकदम्बकं॥

द्वेमिथुनेद्वंद्वंरहस्यमर्यादेतिसाधुः। यत्कालिदासः। द्वंद्वानानाविक्रियेवाविबुधः। युज्यतेधर्मैरन्यायुग्मं। धर्मरत्नोत्तु। युगंलातिक्रम्यलं
मध्यथीयावालञ्च। समूह्यतेऽनेकतसमूहः। निवहतिनिवहः। व्यूहतेव्यूहः। संदुह्यतेप्रपूर्यतेसंदोहः। विस्तिरतिविसरः। व्रजत्युत्ते
व्रजः। गोचरसंचरवरव्रजेतिसाधुः। स्तूयतेस्तोमः। उह्यतेओघः। न्यङ्क्वादिः। निकीर्यतेनिकरः। प्रियतेवारः। संहन्यतेसंघातः। हाहतेवी
संचार्थेनसंचयः। समुदयनंसमुदायः। श्रयतेर्वान्तसमुदयइणोऽच्। समवयनंसमवायः। चीयतेचयः। गणयतेगणः। वृणोतिवृन्दं। निकु
रतिनिकुरंबं। कदंवप्रतिकन्। कसरसंचयात्मकचान्तकदंबं। कुत्सितमवतिवा॥

अ॰टी ४१ समूहविशेषवत्त्वं तदिति शेषः ॥ ॥ सजातीयैः प्राणिभिः प्राणिनिश्च समूहो वर्गः ॥ वृत्यते विजातीयेभ्य इति ॥ प्राणिभिः समूहः सं
हन्यते संघः संघो योगः ॥ अशंसयारितिसाधुः यथा गोसंघः ॥ ंमेव संघाधुपवोगः ॥ सरतिसार्थः ॥ य॒थ॒ा॰ गवृंदं ॥ जंतुनिरित्येव ॥ कुलसं॒सा
नेबंधुषु च ॥ विप्रकुले इत्यादि भित्येव ॥ यथाभ्राह्मणकुलमभिधा ॥ संचीयतेसमजः ॥ समुदायः पशुष्विति पशुभ्योन्येषां वृंदं ॥ यथा श्रोत्रि
यसमाजः ॥ समूह इत्येव ॥ यथा श्रमणा निकायः ॥ निवीयते निकायः ॥ निवासविनिशरीरोपचितिश्चन् ॥ कचेच ॥ धान्यादेरुच्छितेदृंदं ॥ पुंस्य
नपुंसः पूर्यते वारश्यतेराशिः ॥ रसिः सौत्रादी धर्थः ॥ उत्कीर्यते उत्करः ॥ कूयते कूटं ॥ कापोतादिसमूह एतानि वक्तव्ये ॥ अनुदात्ता दे रच्चो

वृंदभेदाः समैर्वर्गस्संघसार्थौ तु जंतुभिः ॥४१॥ सजातीयैः कुलं यूथं तिरश्चां पुंनपुंसकं ॥ पशूनां समजोन्ये
षां समाजोथ सधर्मिणां ॥४२॥ स्यान्निकायः पुंजराशी तूत्करः कूटमस्त्रियां ॥ कापोतशौकमायूरतैत्ति
रादीनि तद्गणे ॥४३॥ गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥ ॥ इति सिंहादिवर्गः ॥
मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ॥ स्युः पुमांसः पंचजनाः पुरुषाः पूरुषा नरः ॥ ॥

आदिशब्दात् काकादि ॥ छायन्ते छेकाः पंजरादौ स्थाप्यंते ॥ गृह्यंते गृह्यकाः ॥ पदास्वैरीनिक्षुपुरस्वार्थे कन् ॥ इति सिंहादिवर्गः ॥ ॥ राम
मनोरपत्यं मनुष्या मानुषश्च मनोर्जातावञ्यतौ षुक् ॥ म्रियते मर्त्यः स्वार्थे यत् ॥ मानवद्वसमर्थतः ॥ अपत्यार्थे अन् अणां वा ॥ वितत्वा ४७
नृताः नि नरः नन्दे ॥ पाति पुमान् ॥ पंचभिर्भूतैर्जाताः पंचजनाः ॥ पुरि पुरिशयनात् पुरणात् वा ॥ पुरुषः अन्येषामपीति वा दी
र्घः ॥ नयति नायते इति निरीच् ॥

स्त्यायत्यस्यां गर्भः स्त्री ॥ यौति पुंसा योषित् ॥ गृष्णरूहि युषी ती तिः ॥ युष्यति अन्यं योति वा योषा ॥ नारी नृनरयोर्वृद्धिश्चेति शार्ङ्गरवादिषु
पाठान्ङीष् ॥ सीमंतः केशवेशोस्त्यस्याः सीमंतिनी ॥ उह्यते सा वध्वा बध्यते नया वध्वी वा वधूः ॥ प्रतीपं वक्रं पश्यति अपांगनिरीक्षणात् ॥
वामा विपरीतलक्षणाया ॥ शृंगाररवेदनाद्वा ॥ वनति भजति वनिता ॥ मह्यते महिला तथा शब्दान्महेलापि ॥ यत्तस्यां अन्यत्र द्विषतः अ
न्नयः परमहेलया ॥ स्वप्नेपि मनसि स्पृष्टा नयः परमहेलया ॥ प्रशस्तान्यंगान्यस्याः अंगना ॥ अंगकल्याणे पामादिभ्यः अन्विनेति
भीलानीरुः नियः ङ्ङ् ॥ कामयते कामिनी ॥ वामे वाधवे लोचने अस्या वामलोचना ॥ प्रकृष्टो मदः कामवेगोस्याः प्रमदा ॥ मानः प्रा

स्त्री योषिदबला योषा नारी सीमंतिनी वधूः ॥ प्रतीपदर्शिनी वामा वनिता महिला तथा ॥२॥ विशेषास्त्वंगना
भीरुः कामिनी वामलोचना ॥ प्रमदा मानिनी कांता ललना च नितंबिनी ॥३॥ सुंदरी रमणी रामा कोपना सै
व भामिनी ॥ वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ कृताभिषेका महिषी भोगिन्योन्या नृपस्त्रियः ॥ ॥

यकोपोस्याः मानिनी काम्यते कांता ॥ लडति लाल्यते वा ललना ॥ लड विलासे ॥ लडडलयोः ॥ नितंबिनी गुरुनितंबा ॥ विशेषा इत्येवा
सुष्ठु आद्रियते सुंदरी ॥ रमंते अस्यां रमणी ॥ रमते रामा ॥ ज्वलादित्वाण्णः ॥ कुप्यति नत्र्छीला कोपना ॥ क्रुधमण्डार्थेभ्यश्चेति युच् ॥ भा
मः क्रोधे ॥ उत्तमस्त्रीपर्यायाः आरुह्यते अस्मिन्नारोहो नितंबः वरः आरोहोस्याः वरारोहा ॥ मत्तेव काशते नातिमत्तकाशिनी ॥ कर्तर्युप
मानेणिनिः वरो वर्णोस्याः वरवर्णिनी ॥ तपस्वी त्येव ॥ श्री महादेवे च ॥ कृताभिषेको यथा वासवदत्ताम्बधं न पूज्यते महिषी ॥ पमात्र
न्याः ॥ भोगोस्त्यासां भोगिन्यः ॥

पत्युर्नयज्ञसंयोगइतिपत्नी।पाणिगृहीतोऽस्याःवरूपीहेच्छोतोदानादित्यत्रपाणिगृहीतादीनांविशेषइतिङीष्॥द्वितीयाधर्मे सहायःसहधर्मोऽस्त्यस्याःसहधर्मिणी।यज्ञादौसहाधिकाराच्च।भरणीयाभार्या।सञ्ज्ञायांभृञ्रुहलोर्ण्यच्।जायतेऽस्यांपुनि ज्ञीया।यन्मनुःजायायास्तद्धिजायात्वंयदस्यांजायतेपुनः।दारयंतिदाराःदारजारौकर्तरिणिलुक्च।अथशब्दात्पुंस्त्यामे पूर्वेणान्वयः।सहचरीच।कुटुंबंभृत्याद्यस्याःकुटुंबिनी।पुरंध्रत्रेपुरंध्री।पुरंधत्तेपुरंध्री।पतिसेवैवव्रतंयस्याःसापतिव्रता।य

पत्नीपाणिगृहीतीस्याद्द्वितीयासहधर्मिणी॥५॥भार्याजायाथपुंभूम्निदाराःस्यात्तुकुटुंबिनीपु रंध्रीसुचरित्रातुसतीसाध्वीपतिव्रता॥६॥कृतसापत्निकाध्यूढाधिविन्नाथस्वयंवरा॥पतिंवराच वर्याचकुलस्त्रीकुलपालिका॥७॥कन्याकुमारीगौरीतुनग्निकाऽनागतार्तवा॥

स्मृतिःनास्तिस्त्रीणांपृथग्यज्ञोनव्रतमिति॥कृतंसापत्निकंसपत्नीभावोयस्याः।अधिउपर्यूढातेद्वितीयस्यामध्यूढा।अ धिविंदत्यस्यामधिविन्ना।स्वयंवृणोतिस्वयंवरा।संज्ञायांभृतृवृजीतिखच्।पतिंवृणोतिपतिंवरा।खच्।प्रियमेत्रअनयाव र्या।अवद्यपण्येतिसाधुःवरमर्हतीतिवा।कुलस्यसंपादयित्री।कनतिकन्या।कनदीप्तौ।अघ्न्यादिःकन्यायाःकनीनचेतिलिंगा
न्नङीप्नास्ति।कुमारयतिक्रीडतिकुमारी।कुत्सितोमारोऽस्यावा।असूर्यावा।अष्टवर्षाभवेद्गौरीदशमेनग्निकाभवेत्।इति स्मान्नोविशेषोनाश्रितः॥गौरवेगौरी।नजतेनग्ना।ओणाजीओलस्जीव्रीडे।अतोनयमान्तेविरजः॥ ॥

अनागतार्तवा।वयसिप्रथमेङीप्स्यात्।नग्नस्त्वजीककहला।अन्नगुणाभ्यासंख्यानुडीशृगनत्तिः।स्तेतिस्नुषा।जायतेऽस्यांजनी। वधूर्टीयामटिकाश्च।चिरणोतिचिरंटीचरतिचरंटीत्येके।वयस्यचरमइतिङीप्।सुष्ठुवसतिसुवासिनी।स्ववासिनीनिर्दिष्टा। नषपतपदेस्युकञ्।वृषंइच्छत्यात्मनःक्यच्।अश्वक्षीरवृषलवणा।नामात्मप्रीतौक्यच्चीत्यत्राश्वरवृषयोर्मैथुनेच्छायामित्यसुक्।जा नपदकुंडेतिमैथुनेच्छायांङीषिकामुकी।यज्ञरतःस्त्रियालक्ष्णोभवेऽश्लिष्टमदनेनमदनेच।अभिसार्यतेकांतंसाभिसारि

स्यान्मध्यमादृष्टरजास्तरुणीयुवतिःसमे॥८॥समाःस्नुषाजनीवध्वश्चिरिंटीतुसुवासिनी।इच्छावती कामुकास्याद्वृषस्यंतीतुकामुकी॥९॥कांतार्थिनीतुयायातिसंकेतंसाभिसारिका।पुंश्चलीधर्षणीबं धक्यसतीकुलटेत्वरी॥१०॥स्वैरिणीपांसुलाचस्यादशिक्वीशिशुनाविना॥

का॥एवुलंतोयं।वासकसज्जाविरहोत्कंठितास्वंडितविप्रलब्धाकलहांतरिताप्रोषितभर्तृकास्वाधीनदयितेतिअन्याःसप्त। वर्षेवाभ्रदर्शिताः॥पुंमांसंचालनतिपुंश्चली।कर्षतिचेतःधर्षणी।धृषेरादेश्वरः।बध्नातिबंधकी।कुलान्यटतिकुलटा।शकंध्वा दिः।कुत्सितंलटतीत्येके।एतितच्छीलाइत्वरी।वपल्गज्ञान्नसंज्ञीतिकरप्।स्वेनईरितुंशीलास्वैरिणी।स्वस्वैरिण्यादिनिर्दिष्टः। पांसुर्मालिन्यहेतुरस्त्यस्याःपांसुला।सख्याशिक्वीनाषायामितिसाधुः॥ ॥

अ॰टी
४९

न विद्यते वीरो यस्याः निष्पुत्रावस्या अवीरा । विश्वसिति स्म विश्वस्ता । विगतो धवो भर्त्ता यस्याः सा विधवा ॥ अलत्यानी यच्छत्रतः आलिः
सखी सेतुराली रालिः । वलिरिष्यते । समानं ख्याति सखी । पयसा तुल्या च वयस्या । नौ वयो धर्मे नियन्त्र । सध्रीचीचा । अथ पतिवत्नि
तो भुक्ता ङीप् च । असितपलितयोः छन्दसि क्नमेके । भाषायामपीष्यत इति ङीष् । प्रज्ञा नातीति प्रज्ञा । इद्युपधनिकः प्रज्ञादि
भ्यश्चार्थे वाण् । प्रज्ञास्त्यस्याः प्रज्ञा श्रद्धार्चाभ्यो णः । पुंयोगादाख्यायामिति ङीष् । शूद्रजातीया शूद्रा स्त्री शूद्रा वा मह
पूर्वा जातिरित्यजाद्यत्वाट्टाप् । आभीरजातीया महाशूद्रस्य स्त्री च । जातिलक्षणः पुंयोगे च ङीष् । वैश्यपन्नेदं एव । भीरागवा

अवीरा निःपतिसुता विश्वस्ता विधवे समे ॥ ११ ॥ आलिः सखी वयस्या च पतिवत्नी सभर्तृका । वृद्धा पलिक्नी
प्राज्ञी तु प्रज्ञा प्राज्ञा तु धीमती ॥ १२ ॥ शूद्री शूद्रस्य भार्या स्याच्छूद्रा तज्जातिरेव च । आभीरी तु महाशूद्री जाति
पुंयोगयोः समा ॥ १३ ॥ आर्याणी स्वयमार्या स्यात् क्षत्रिया क्षत्रियाण्यपि । उपाध्यायाप्युपाध्यायी स्यादाचा
र्यापि च स्वतः ॥ १४ ॥ आचार्याणी तु पुंयोगे स्यादर्यी क्षत्रियी तथा । उपाध्यायान्युपाध्यायी ॥ राम ४९

धुपजीवी । अन्यत्र महती चासौ शूद्रा च महाशूद्रा । स्वयं पुंयोगं विना । आर्यक्षत्रियाभ्यां वेति स्वार्थे ङीषानुकौ । पक्षे टाप् । योप
धेत्य । जातिलक्षणो ङीष् नास्ति । स्त्रियामित्येव । उपेत्य । धीयते स्याः अपादाने स्त्रियामुपसंख्यानात् वा ङीष् । स्वयं मन्त्रव्या
ख्यात्री वा आचार्या स्वतो ज्ञाता वित्यर्थः । यापव्याख्याता ते ङीष् नास्ति । इन्द्रवरुणेति ङीषानुकौ । आचार्यादणत्वं चेति वक्तव्यं । पुंयोगे इत्ये
व । उपाध्यायमातुलाभ्यां वेति पक्षे ङीषानुकौ ॥

पुंसः संश्लेषतो । अनयव्यं जनापेरा । नपुंसकाख्या । नित्यं सपत्न्यादिषु चेति नान्तत्वात् । इन्नेन्यो ङीष् । वीरं सूतवती वीरसूः सत्सूद्विषे
ति क्विप् । वीरप्रसूर्जगति नार्गे वरेणुके वा । वीरस्य प्रसूर्मातेत्यर्थः । जीवत्तोका तु जीवत्सूः । वोदा तु कटहारिणी । जनयितुं प्रयत्ना
प्रजाता सूतका प्रसूतका । इदारका । णाभितिपक्षे ङीष् । व्याख्याथ हृत्वा । पुंयोगपि ङीष् नास्ति । विवस्त्रा योषित् स्युः कोऽशीतायामः
कोटेन लज्जावशात् कुटिलं च नेवति कोटवी । इयं तस्या मौखर्यानूह्ली । संचारयति संदेशं प्रापयति संचारिका । कतस्यापत्यमि
व कात्यायनी । ऋषिपत्न्याकारत्वान्नित्यं लक्षणोऽयं काषाये रक्ते वस्त्रे शुद्धत्वादस्याः काषायवसना । अथ वा अपुंस्का रंडेत्यर्थः । शि

पोरा स्त्री पुंसलक्षणा ॥ १५ ॥ वीरपत्नी वीरनार्या वीरमाता तु वीरसूः । जातापत्या प्रजाता च प्रसूता च प्रसूतिका
॥ १६ ॥ स्त्री नग्निका कोटवी स्याद्दूतीसंचारिके समे । कात्यायन्यर्द्धवृद्धा या काषायवसनाऽधवा ॥ १७ ॥ सैरंध्री परवे
श्मस्था स्ववशा शिल्पकारिका । असिक्नी स्यादवृद्धा या प्रेष्यान्तःपुरचारिणी ॥ १८ ॥ वारस्त्री गणिका वेश्या रूपा
जीवाऽथ सा जनैः ॥ सत्कृता वारमुख्या स्यात् ॥ ल्यं प्रसाधनादि । तेन पापरवेश्मान्युपजीवति स्ववशा

स्याय त्राणे कायत्वा भक्तवृत्तीत्यर्थः । सदृणं स्वेरं गोधरते सैरंध्री चतुःषष्टिकलाभिज्ञा शीलरूपादिसेविनी । प्रसाधनोपचा
रज्ञा सैरंध्री निकाय्यः । असितपलितयोः कन्च ङीष् । प्रास्ये प्रेष्यया दृद्धिः । वाकापडत्यके । तन्नयन्ति ताभिः असिक्निका स्यादवृद्धा
या प्रेष्यान्तःपुरचारिता । वारेरा वृन्देवादिसिवा क्रमे स्त्री वारस्त्री । गणाः पेटकोऽस्त्यस्याः गणयति शिखरा अनीश्वरो वा गणिका । वेशे वेश्या

अ॰टी॰ ५०

कुट्टयति कुट्टनी । शं श्रेयो नालयति शंभली । पुंक्लेकौलाति वा शंभली । द्वे दूत्याः ॥ विप्रश्नो दैवप्रश्नस्तेन शुभमशुभं वा लक्ष्याः । दैवं शु-
भाशुभं कर्म जानातीति दैवज्ञा ॥ त्रीणि पुंस्त्र्या पुंस्त्रवेश्यपद्यान्नु । रजोऽस्त्यस्याः रजस्वला । रजःकृष्यासुतीनिवलच् । स्त्रीधर्मोऽस्त्यस्याः
स्त्रीधर्मिणी । अत्रेरपत्यमात्रेयी । मलिनाऽङ्गत्वान्मलिनी । मालादिनन्द्यादिः । ऋतू रजोऽस्त्यस्याः ऋतुमती । उदकाऽसंज्ञायां यत्सुद-
क्या । उदकमर्हतीति । पुष्पितेति मालः । पुष्पवत्यवीरितिपाठः पठ्यते । अत्यनेन क्षत्रे चेन्यावीः अविः स्त्री तेन निपात्यतेऽवी रात्र
या । ... यत्कात्यस्य । अविः स्त्री धर्मिणी विद्यानु । पुष्पं फलहेतुत्वाद् रजः ऋतु रमान्तेवे ऋतुः स्त्रीरजो । ऋतोगनेयहा । के-
यान्ये के । ...

कुट्टनी शंभली समे ॥१९॥ विप्रश्निका त्वीक्षणिका दैवज्ञाथ रजस्वला ॥ स्त्रीधर्मिण्यविरात्रेयी मलिनी पुष्प-
वत्यपि ॥२०॥ ऋतुमत्यप्युदक्यापि स्याद्रजः पुष्पमार्तवं ॥ श्रद्धालुर्दोहदवती निष्कला विगतार्तवा ॥२१॥
आपन्नसत्त्वा स्याद्गुर्विण्यन्तर्वत्नी च गर्भिणी । गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥२२॥

लेनवेवा । ऋतुः प्राप्तोऽस्या वा । निद्रातन्द्राश्रद्धाभ्य आलुः । दोहदं गर्भिणीनामभिलाषो विद्यतेऽस्याः दोहदवती । निष्क्रान्ता कला-
त्पुष्पान्निष्कला । विगतमार्तवं यस्याः । आपन्नं स्थितं सत्त्वं गर्भो यया आपन्नसत्त्वा । गुरुर्गर्भोऽस्त्यस्याः गुर्विणी । पीहादित्वादिनिः । गुर्वीतिवना
गुरिः । अन्तर्विद्यतेऽस्या अन्तर्वत्नी । अन्तर्वत्पतिवतोर्नुक् । गणिकानां समूहो गाणिक्यं । गणिकायाश्च यञ् । गर्भिणीनां स-
मूहो गार्भिणं । भिक्षादित्वादण् । ... युवतीनां समूहो यौवतं । युवत्या अपि
भिक्षादिगणपाठात् । तस्याः तद्धित इति पुंवद्भावो नास्ति ॥

पुनर्भवति पुनर्भूः द्वेधा ... द्विरूढा संस्कृता । यदा ... संस्कृता पुनः ...
... सा चाग्रे दिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता । पुनर्भ्वाः पतिः किं तु पुनर्भूपतिः ...
एव पुनर्भूर्दिधिषुस्तस्याः ... दिधिषूमिच्छति ... अग्रे ... दिधिषूर्यस्य सोऽग्रे-
दिधिषुः समासान्तविधिरनित्यः । कन्यायाः कनीनश्चेत्यण् । कल्याण्यादीनामिनङ् इतीनङ् । एवं सौभागिनेय इत्यादावपि ।

पुनर्भूर्दिधिषूरूढा द्विस्तस्या दिधिषुः पतिः ॥ स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥२३॥ कानीनः कन्य-
काजातः सुतोऽथ सुभगासुतः ॥ सौभागिनेयः स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥२४॥ पैतृष्वसेयः स्यात्पैतृष्व-
स्रीयश्च पितृष्वसुः ॥ सुतौ मातृष्वसुश्चैवं वैमात्रेयो विमातृजः ॥२५॥ अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसु-

तः ॥ ... सिद्धेन पूर्वपदस्य ... कल्याण्यादिः ॥ पितृष्वसुश्छण् । ढकि लो-
प इति ज्ञापकाट्ठक् । अन्त्यलोपश्च । सुत इत्येव । मातृष्वसुश्च । मातृष्वस्रीयः । किलोपश्च । निठक् । मातृष्वसेयः । विरुद्धाया
मातुरपत्यं वैमात्रेयः । सोदर्या भ्राता । शुभ्रादित्वाड्ढक् । स्त्रीभ्यो ढगित्यत्र स्त्रीप्रत्ययग्रहणात् । सा माता ... मातृकः । बन्धक्या
अपत्यं बान्धकिनेयः । कल्याण्यादीनामिनङ् इति ढकि इनङ् ... कुलटाया अपत्यं स्त्रीभ्यो ढक् । क्षुद्राभ्य
इति वा द्रक् ॥

अ॰टी॰ साहिनिद्रार्थिनी कुलान्यटति। कुलटा या चेति टागिनेड। पचेत् ढगेवा। कुड्डा चान्नावान्। अंगथीलूहीना। रिहुड। नंनाति कुलं तन
५१ नयः। सूयते सूनुः। सुवति वा। सुतः। पुन्नाम्नः नरकात् त्रायते पुत्रः पुनाति वा। पुवा कस्वक्षति तनुः। दारकदायादौ च। आत्मजादयः स्त्रियां तु
दुहित्वावुकाः। गौरादेर्दुहित्री। दोग्धि पितरौ दुहिता। पुत्रे दुहितरि च समान्येन वर्त्तते। अपतनमपत्यं। अपान्निसा चापत्यं। सूयते
तोकं। संततिः संतानः। नंदनोद्व्रजाद्यं। उरसा निर्मितयचौ नं आप्रते। तनोति कुलेनातः स्वार्थेण। जनयति जनकः।

भिक्षुकी च सती यदि ॥२७॥ तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ॥ आत्मजस्तनयः सूनुः सु
तः पुत्रः स्त्रियां त्वमी। आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे ॥२८॥ स्वजाते त्वौरसोरस्यौ तातस्तु जनकः पि
ता। जनयित्री प्रसूर्माता जननी भगिनी स्वसा ॥२९॥ ननांदा तु स्वसा पत्युर्नप्त्री पौत्री सुतात्मजा ॥ भा
५२ र्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परं ॥३०॥ प्रजावती भ्रातृजाया मातुलानी तु मातुली। पतिपत्न्योः प्रसूः श्वश्रूः ॥

पाति पिता। वप्ता वा। या जनित्री विलोक्याइति। अनर्न्योविनरपर्थचा। प्रसूयते प्रसूः। माति अस्यां गर्भो माता। नगं कल्याण
मस्यस्याः भगिनी। सुष्ठु अस्यते स्वसा। सुञ्चसो ऋन्। नृषस्वस्रादिन्याइति निष्ठुनात्सि। ननंदति चाहं न जायां ननांद। दन्निन
व्दरिति ऋन्। नप्ततनया कुलं नप्त्री। पुत्रस्यापत्यं पौत्री। सुतस्यात्मजा। यततेस्पृहयाया तरः। यततेर्हि श्रौलि ऋन्। क्तो नेविध
याभिसंबंधेन्पूर्वइति षष्ठ्या अलुक्। अलिसत्र्भीसमासाच। यथा अस्य सिभ्रातृजाया। इदकृतौ निर्दीष्टा तुको। उपाध्यायमातुला
न्योर्वृत्तिनिर्देशेषु। पत्न्यां तापत्न्याः। श्वश्रूः पत्न्यामाताप्रसूः श्वश्रूः श्वशुरस्याकाराकारः लोपश्चेत्यूङ्।

तयोः पतिपत्न्योः पिता अन्योन्यं श्वशुरः। शुपूजितेऽकृचा श्रुते॥ पितृव्यमातुलमातामहपितामहाइति साधुः। श्यायति श्यालः। श्यम
वितर्के। स्माद्द्वाषन्तुः शालाइत्यर्थः॥ स्वामिनः पत्युर्भ्राता कनिष्ठः। पन्न्यादीव्यतीति देवः। दिवेऋन् कृदूर्ध्वं कर्मिण्यामिदेविवानि
न्यस्य नरः देवरः॥ स्वसुरपत्यं स्वस्रीयः स्वसुश्छः। जायां मितेजामाता। पुगतः पितामहात्। मातुः पिता मातामहः। तत्पिता प्रमाता
महः। समानः पिंड एषां। यत्स्मृतिः सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते। सप्तमाद्वेसगोत्राः। समानो नाभिर्मूलमेषां सना

श्वशुरस्तु पिता तयोः ॥३१॥ पितुर्भ्राता पितृव्यः स्यान्मातुर्भ्राता तु मातुलः। श्यालाः स्युर्भ्रातरः पत्न्याः स्वामि
नो देवृदेवरौ ॥३२॥ स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः। पितामहः पितृपिता तत्पिता प्रपिताम
हः ॥३३॥ मातुर्मातामहाद्येवं सपिण्डास्तु सनाभयः। समानोदर्यसोदर्यसगर्भ्यसहजाः समाः ॥३४॥ सगो
त्रबांधवज्ञातिबंधुस्वस्वजनाः समाः। ज्ञातेयं बंधुता तेषां क्रमाद्भावसमूहयोः ॥३५॥

नयः। घोनिर्जनपदेति सच्चो समानेउदरे शायिनः समानोदर्याः समानोदरे स्थितः इति यः। सोदरशब्दात् सोदराद्यः। विना
षा सोदर इति सत्वं। समाने गर्भे भवः सगर्भ्यः सघथ सतुनाघत्र। सोदसोपितास्य कोनिषा नात्। सहजायते सहजो भ्राता। समानं
गोत्रमेषां सगोत्राः। ज्ञाति जनपदे निसत्वं ज्ञायते ज्ञातिः। बध्नाति बंधुः स्वार्थेण। एकत्वे ज्ञाति वचनः स्वस्यात्मीयार्थः। ज्ञा
तीनां वो ज्ञातेयं। कपिज्ञात्योर्ढक्। बंधूनां समूहो बंधुता। ग्रामजनबंधुसहायेभ्यस्तल्। तलिस्त्रीलिंगवचनं॥

अ॰टी
५२

युनेतिधवार्थाः शानिप्रियः इयुपधोनिकः यानिपतिः पातेर्डतिः सेक्तावरपिनावरश्चाजारयतिजारः दारज्जारोकर्त्तरिणोलुकुवा
उपज्ञातः पतिउपपतिभर्त्तरीत्यवाकुणयते कुत्सनेन कुंडः कुंडिदाहे जारजइत्येव प्रसूतेनतज्ञाकरश्चौकाष्पतगोलः परानाम्नाप्रि
येतेह्वास्तुनेकुण्डगोलकौ॥ पत्यौजीवतिकुंडस्तुमृतेभर्त्तरिगोलकइतिस्मृतिः भ्रातुरपत्यंभ्रात्रीयः भ्रातुर्व्यश्चेतिवाछः भ्रातृ
श्चोनानार्थेभ्राता चभगिनीचेतिभ्रातरपुत्रौ॥ स्वसृदुहित्रोरित्येकशेषः एवंपुत्रौ॥ माताचपिताचमातापितरौ॥ आनङृतोद्वंद्वे॥

धवः पतिः प्रियो भर्त्ता जारस्तूपपतिः समौ॥ अमृते जारजः कुण्डो मृते भर्त्तरि गोलकः॥३५॥ भ्रात्रीयो भ्रातृजो भ्रा
तृभगिन्यौ भ्रातरावुभौ॥ मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ॥ श्वश्रूश्वशुरौ श्वशुरौ पुत्रौ पुत्रश्च दुहि
तावा दंपती जंपती जायापती जायापती च तौ॥३६॥ गर्भाशयो जरायुः स्यादुल्वं च कललोऽस्त्रियां॥ सूतिमा
सो वैजननो गर्भो भ्रूण इमौ समौ॥३७॥

पितामात्रेत्येकशेषोवा॥ मातरपितराबुदीचामित्यन्यः साधुः प्रसूर्माताजनयिता पिता चेतिद्वंद्वे विसंज्ञौ॥ श्वशुरः श्वश्र्वेत्येक
शेषोवा॥ राजदंतादौजायाशब्दस्य जंभावोदंभावश्चनिपात्यतेदंनार्थेतिनिघंटुः गर्भेआशेतेस्मगर्भाशयः जरांजीतिजरायुः
उल्पतापत्याणातिउल्वं कलयतिकेलयतिवाकललः आधुभ्रूणाणिसमायः प्रसिद्धास्यपर्यायानोकोअस्त्रीत्विविधानार्थंतुकिञ्चिः
उल्वपर्यायः कललइत्येके यच्छुनिः तदुल्वंकललंवतत्र दशमेमासिसूतवइतिश्रुतेः नवमदशमेमासिप्रवलेः सूतिमाकृतौ॥ निसो
र्येनेबाणःइवयंत्रछिद्रासन्नवरइतिस्मृतेश्च॥ नवमोदशमोवामासोविजननेनवावैजननः॥ गीर्यतेगर्भः स्त्रियतेभ्रूणः कुक्षिस्थः राम
५२

स्त्रीपुंसाभ्यामन्यातृतीयाप्रकृतिः लिंगांतरवान्॥ शाम्यतिशंढः क्लीवतेक्लीवः पिंडतिषिंडः पंडश्चानस्त्रीपुंसौनपुंसकौनत्राणनुप
दितिसाधु॥ सनपुंसको नवेदितिनाध्या पुंस्यपि॥ शिशोर्भावः शैशवं॥ प्राणान्क्रन्नातीत्याणः॥ यूनोभावोयौवनं॥ हायनान्तयुवादिभ्य
ण॥ गोत्राञ्चाइत्यत्रवृद्धाश्चेतिवक्तव्याद्वुञ्॥ मनोज्ञादिच्याद्वावकर्मणोरप्यादुः॥ यथावार्द्धकेश्वनिरद्भीनां॥ पलतिशौक्ल्यं॥ नेनपलितं
पलगतौ॥ आदिशब्दाद्रोमादौच॥ विस्रंसतेः नयाकवांगविस्रसा॥ जीर्यन्त्यनयाजरा॥ षिभिदादिभ्योङ्॥ उत्तानाशेतेउत्तानशया

तृतीयाप्रकृतिः षण्डः क्लीवः पण्डो नपुंसकं॥ शिशुत्वं शैशवं बाल्यं तारुण्यं यौवनं समे॥४०॥ स्यात्स्था
विरं तु वृद्धत्वं वृद्धसंघेऽपि वार्द्धकं॥ पलितं जरसा शौक्ल्यं केशादौ विस्रसा जरा॥४१॥ स्यादुत्तानश
या डिम्भा स्तनपा च स्तनंधयी॥ बालस्तु स्यान्माणवको वयस्थस्तरुणो युवा॥४२॥

अधिकरणेशेतेरित्यत्रोत्तानादिषुकर्तृष्वित्यच्॥ डिंभेतिप्राक्पक्षिप्रक्रमेणोक्तं॥ द्दृमान्तुषक्रमादुस्तनंपिबतिस्तनपाबुपी
लियोगविज्ञाणकः स्तनंधयतिस्तनंधयी॥ नासिकास्तनयोर्ध्माधेटोः खश्च॥ षिद्गौरादिभ्यश्चेतिङीष्॥ स्त्रीलिंगेननिर्देशः स्त्रीप्रत्य
यप्रदर्शनार्थः॥ चलतिप्राणानिवालः ज्वालादिभ्योणः चाङ्क्षाज्ञार्थेस्माद्ध॥ अपत्येकुत्सितेमूढेमनोरौत्सर्गिकः स्मृतः॥ न
रकस्यवमूर्द्धन्यः सनसिध्यतिमाणवः॥ स्वार्थेकन्॥ वयसितिष्ठतिवयस्थः तरतितरुणः॥ यौतिमिश्रीनवतिरिक्ति
याभुवा॥

पत्री ५३

प्रगतं वयोऽस्य प्रवयाः। तिष्ठतिस्थविरः वर्द्धते स्म वृद्धः एवमादो गडुरिकाप्रवाहेन चूते क्तः वर्त्तमाने तु पुक्तः शीतिलिनादित्वात् जिनाति स्म जीनः ग्रहिज्या वयीति संप्रसारणं। संप्रसारणोति दीर्घः ल्वादिभ्यो निष्ठानत्वं जीर्यते स्म जीर्णः अथ कः किनी त्यन्तः जीर्यतेरतृन् अ- त्यन्तः अतिशयेन वृद्धो वर्षीयान्। इयस्तु नि प्रिया स्थिरो तिवर्षादेशः दशमी अवस्था विशेषोऽस्याति दशमी। वयसि पूरणात् इनीनि यन्मुनि- इष्टो वयो दशोपेतः पंचमी सप्तमी दशमीति च अतिशयेन वृद्धो ज्यायान् च प्रशस्य वृद्धस्य वेति ज्यादेशः ज्यादादीयसः इत्यात्। अयं जातः

प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि॥ वर्षीयान्दशमी ज्यायान्पूर्वजस्त्वग्रियोऽग्रजः॥४३॥ जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः॥ अमांसो दुर्बलश्छातो बलवान्मांसलोंऽसलः॥४४॥ तुंदिलस्तुंदिभस्तुंदी बृहत्कुक्षिः पिचिंडिलः। अवटीटोऽवनाटश्चावभ्रटो नतनासिके॥४५॥

अग्रियः अग्र्याधन्। छो चेति वः अग्र्यार्थीयो वा अग्रिमपाठे अग्र पश्चादिभ्य इम् अत्र। जघन्यजः पश्चाज्जातः अत्यर्थं युवा कनिष्ठः अयवी- यांश्च युवाल्पयोः कन् अन्यतरस्यां। स्थूलदूरेत्यादिना लोपः पूर्वस्य च गुणः एवं कनीयान्। यविष्ठश्च। अवरे जायते अवरजः छरतिस्म छातः छो छेदने। मांसमस्यास्ति मांसलः। सिध्मादित्वाल्लच्। अंसो बलमस्यास्ति अंसलः च सांसात्यो कामबल इति लच्। तुंदोऽपि वंउत्तरस्यास्ति वेदादिभ्यः इल च्छेति बादि निरुक्तो। उदरिलोऽपि। तुंदिरस्यास्ति तुंदिभः। तुंदिवलि वटेः नतेन नासिकाः संज्ञायामटीटच् नतनासिकाः अपिटचोऽण्। नतास्या नासायो नासनमनेऽप्येते वर्त्तन्ते॥

प्रशस्ताः केशाः सत्यस्य केशवः केशाद्वोऽन्यतरस्यां। वलिस्त्वक्संकोचोऽस्यास्ति पामादित्वान्नः तुंदिवलिवटेर्भः श्रूयते पसार्य्यते योग- ः खर्वतीति खर्वः ह्रस्वति ह्रस्वः वामो अस्यास्तीति वामनः। निखर्वः सहरः खर्वइति नाममाला। खरा तीक्ष्णा खरस्येव वा नासास्य खरणाः खरखुराभ्यां नस्वा वक्तव्यः पक्षे अन नासिकायाः संज्ञायां नसं चास्थूलात्। पूर्वपदात्संज्ञायांगणः चे तुडः तुद् नासिकः वि- गतविगतनासिकः वेः ग्रो वक्तव्यः। खुराकारा नासिका यस्य खुरणाः। विकटत्वोणः। प्रगते विरले वा जानुनी यस्य तथा ऊर्ध्वसेह

केशवः केशिकः केशी वलिनो वलिनः समौ॥ विकलांगस्त्वपोगण्डः खर्वो ह्रस्वश्च वामनः॥४६॥ खरणाः स्यात्खरणसो विग्रस्तु गतनासिकः॥ खुरणाः स्यात्खुरणसः प्रज्ञुः प्रगतजानुकः॥४७॥ ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्संज्ञुः संहतजानुकः॥ स्यादेडे बधिरः कुब्जे गडुलः कुकरे कुणिः॥४८॥ पृश्निरल्पतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते॥ वलिरः केकरे खोडे खञ्जस्त्रिषु जरावराः॥४९॥

तेव जानुनी अस्य। प्रसंभ्यां जानुनोर्ज्ञुः ऊर्ध्वाद्विभाषा। एडा पथुरिवाउः वद्धो कर्णावस्य बधिरः कुब्जितउरः कुब्जः पृषोदरादिः ग- डुरस्यास्ति गडुलः। सिध्मादित्वाल्लच्। कुणाः च कुपाणिः। कुणतीति निरुक्ताः। कलेव करत्व वा कार्णीः स्खलति स्खिद्यते भकः। श्रोण- तृष्णातिवा श्रोणिः। श्रोणृ संघाते। कुटिलजंघापादः मुण्डनेमुंडः। वलने चेष्टने वलिर्नेत्रं तद्योगाद्वलिरः। केकरः कुकरोत्पादितानी वल- ... करः। एतस्या अयः का चर इत्यास्वा अरवुडप्रतिवानेन खडियेकल्या। खोडा खञ्जमीनायापि॥ जराशब्दादुत्तरो उत्तानशयादयः ... नास्त्रिलिंगा॥

अ॰री जडतिजडुलः जडुलो जडश्चाद्ध।कालएव कालकः। अपिप्लवतेपिप्लुः।तिलप्रतिकृतिः तिलकः। तिलइव कालकः तिलकालकः। देहेकृष्ण

५४ लक्ष्म।आमयस्याभावोऽनामयं। अव्ययं विभक्तिसमीपेत्यर्थाभावेऽव्ययीभावः। किंतो व्याधिप्रतीकारसंज्ञं।विषमपतन्ते नेन नेषजं।भिषकु

कंड्वादि।अनंतावसथेतिनिर्देशाकुणः।नेषं रोगं जयतीतिदुर्गः।औषधरजातोस्वार्थेऽण्।अनंतावसथेतिनेषमा।अपः स्वार्थो।अवि

द्यमानोगदोऽस्मिन्नगदः।जयतिरोगान्जायुः।कृयापाती तिडण्।रुज्यतेरुक्।क्विप्।निदाद्यउव्याधीयतेऽप्रथ्यौ।व्याधिः।गादतिव्यथते

दः।आमीनात्यामयः।अमरोगे।अस्माद्धा।आमयोपि।पुमानयक्ष्मा।यक्ष्यतेपूज्यतेरोग।राजत्वात्स्मार।नयक्ष्मापि।क्षीयतेऽनेनक्षयः।

जडुलः कालकः पिप्लुस्तिलकस्तिलकालकः॥अनामयं स्यादारोग्यं चिकित्सारुक्प्रतिक्रिया॥५०॥भेषजौष

धभैषज्यान्यगदो जायुरित्यपि।स्त्रीरुक्रुजाचोपतापरोगव्याधिगदामयाः॥५१॥क्षयः शोषश्च यक्ष्मा च प्रति

श्यायस्तु पीनसः स्त्रीक्षुत् क्षुतं क्षवः पुंसि कासस्तु क्षवथुः पुमान्॥५२॥शोफस्तु श्वयथुः शोथः पाददारी वि

पादिका। किलाससिध्मे कच्छ्वां तु पामपामा विचर्चिका॥५३॥

शुष्यत्यनेनशोषः।प्रतिश्यायतेस्रवतिप्रतिश्यायः।स्याद्ध्येतिण्।पीनंस्यानिभ्यं तं नयतिपीनसः।क्षवणं क्षुत्।क्विप्।क्तः।अप्। राम

कासतेऽनेनकासः।क्षौत्यनेनक्षवथुः॥शवातिविसर्पतिशोफः।शोथश्चा।श्रूयतेऽनेनश्वयथुः।विपद्यतेनया।विपादिका।पादस्फुटत्य ५४

त्यत्राऽन्यत्रापीतिवक्तव्यात्कुन्।लोपोवा।समइतिशोषः।केलसतिकिलासं।सिध्यतिसिध्मं।मलतिक्षुत्वाखं।कषतिकच्छूः।पिबतित्वं

गंपामा।डाबुन्।पामन्या।तरसीविकर्षयतिविचर्चिका।अंगुल्यादिसंधिषुस्फूमाः।पिटकाःखजूर्विशेषइत्येके॥

कंडूतिःकंडूःकंडूःकंडूयाविक्विप्।अप्रत्ययात्।खर्जतिखर्जूः।कर्जखर्जेव्यथने।विस्फोटतीतिविस्फोटकः।पटतिसंश्लिष्यतिपेटयतिवापिटका।

व्रणायतिव्रणः।इरस्यत्यंगंईर्मं।इरत्येरुः।अरुः।नाडीव्रणःसमासेपुंस्त्वं।नालिक्ष्यकूयतेशब्दतेकोठः।मंडलाकृतिकुष्ठंसमइति

शेषः।कुष्णात्यंगंकुष्ठं।कुत्सितंतिष्ठतिवा।श्वेतवर्णगात्रमीतिषच्चा।श्वेततोश्वित्रं।श्वेतकुष्ठं।पापरोगश्चाडुनाम्ना।इयत्यश्रोंगुदजंग्य

दकीलकेच।आनाहनं।विण्मूत्रनिरोधः।गृह्णातिग्रहणी।जाठराग्नि।तत्रशैथिल्यात्कुरोगः।मलप्रवहन।प्रवाहिका।रोगाख्या।

कोठोम

कण्डूःखर्जूश्चकंडूया।विस्फोटःपिटकास्त्रिषु॥व्रणोऽस्त्रियामीर्ममरुःक्लीबेनाडीव्रणःपुमान्॥५४॥

कुष्ठश्वित्रे दुर्नाम्ना कार्शसी॥आनाहस्तुविबन्धःस्याद्ग्रहणीरुक्प्रवाहिका॥५५॥प्रच्छर्दिकावमिश्चस्त्री

डलकं

पुमांस्तुवमथुःसमाः।व्याधिभेदाविद्रधिःस्त्रीज्वरमेहभगन्दराः॥५६॥अश्मरीमूत्रकृच्छ्रंस्यात्पूर्वेशुक्रावधिस्त्रिषु।रोगहार्यगदंकारोभिषग्वैद्योचिकित्सके॥५७॥

यंराबुल्।वमनंवमिःच्छर्दिःच्छर्दिव।विद्रात्यनया।विद्रधिः।विद्राधीयतेस्याःवामेहतिमूत्रयतेनेनमेहः।प्रमेहोपि।दीपप्रदीपवज्ज्ञेन

गं दारयतिभगंदरः।स्फिक्संधौपिटक।पुंसः।सर्वयोःदारिसदारित्यत्र।भगवदारेर्वक्तव्यात्।बच्।सीपद्पादद्यन्मीवकेश।अश्मरीत्रि।डु

मकं।व्याधिभेदाइत्यवा।अश्मांनमुज्ञातीतिअश्मरी।शुक्रान्मूर्च्छितानांवाच्यलिंगाः।अगदःक्रियतेऽनेनअगदंकारःकारक

त्वागदस्यातिमुम्।भिषज्यतिभिषक्।विद्यामधीतेवेदवावैद्यः।आयौसामान्येनोपधादावपीत्येके॥

अम॰ री
५५

वमतिवान्तःवार्त्तइतिवुयुक्तं। यद्यप्यतिवार्त्तः फल्गुन्यरोगेवत्रिषुइतिरभसः। ...कलाःसुसाधुःकल्पः
उल्लाघतेस्मउल्लाघः क्तः। अनुपसर्गात्फुल्लेतिसाधुः। ग्लायतिस्मग्लानः संयोगादेरातोधातोरितिनिष्ठानत्वं। ग्लायतितच्छील
ग्लास्नुः ग्लाजिस्थश्चक्स्नुः। आमयोस्यास्तिआमयावी। सर्वत्रामयस्योपसंख्यानादिति दीर्घः। व्याधिःसंजातोस्य व्याधितः।
अपटुर्मंदः आतोस्त्यातुरः। अभ्यमितोभ्यान्तः। ... संघातश्चत्वारिमेरकंमारिमीरीवरेखने

वार्त्तोनिरामयःकल्यउल्लाघोनिर्गतोगदात्। ग्लानग्लास्नूआमयावीविकृतोव्याधितोपटुः॥५०॥ आतुरोभ्यमि
तोभ्यान्तःसमौपामनकच्छुरौ। दद्रुघ्णोदद्रुरोगीस्यादर्शोरोगयुतोर्शसः॥५१॥ वातकीवातरोगीस्यात्साति
सारोतिसारकी। स्युःक्लिन्नाक्षेचुल्लचिल्लपिल्लाःक्लिन्नेक्ष्णिचाप्यमी॥ उन्मत्तउन्मादवतिश्लेष्मलःश्लेष्मणःकफी॥

निश्चीहर्षे॥ पामास्यास्तिपामनः। पामत्वयेके। द्वावपीतिश्री... कच्छुःअस्त्यस्येतिरः। पामादित्वाच्छ... लीदीर्घ...
दद्रुःअस्त्यस्येतिनः दीर्घत्वमनयादद्रूः। अर्शांसिसन्त्यस्यअर्शसः अर्शआदिभ्योच्। वातोविद्यतेअस्यवातकी। वातातीसाराभ्यां
कुक्चेतीनिः। एकदेशविकृतत्वात् अतीसारकर्मिणि। क्लिन्नस्यचल्लचिल्लपिल्लोलश्चचक्षुषीतिवक्तव्यात्साधवः। चक्षुःक्लेदयति
तेनचक्षुर्गतःक्लेदःचुल्लोनामरोगः। तद्योगात्चुल्लंचक्षुः। चुल्लचक्षुष्ट्वाच्चुल्लःपुमान्। उन्मादोवातभूतादिदोषाच्चित्तविभ्रमः। श्लेष्म
स्यास्तिसिध्मादित्वाल्लच् पामादित्वान्नः॥ ॥ राम
५५

...पुत्रनंस्युत्रनःवधूत्नुनस्युत्रनोवागुपतापयोरितिसाधुः। स्युनः कुब्जःयुक्तेनपाणिगतेनअर्चनेनयोगात्स्युत्रनःपुमान्। पश्चाद्भूतः
विघादबोगत्स्युत्रनःस्युत्रनः कुब्जउदाहृतः। तुंडिरूत्रततनाभिः। तुंदिस्तुजठरइत्यमरः। तुंदिवलीस्तेनश्चैकदेशस्यविकृतत्वात्॥ सिध्मा
दित्वाल्लच्। अंधोदृक्। अंधःइत्युपसंहारे। नास्तिदृगस्याः... मूर्छास्त्यस्येतिप्राणिस्थादातोलच्। ... पद्यथते। मूर्छेति
मूर्तःरात्वलोपइतिछलोपःनधावान्तिनचान्तवःमूर्छासंजाता। स्यमूर्छितः ...दिमूर्छे ...वा। शीकतिस्रवतिशुक्रं। तेजय

स्युब्जेकुब्जगडुलःकुकरःकुणिः ...नोतुंडिलस्तुंडिभः॥६१॥ किलासीसिध्मलोन्धोदृङ्मूर्छालेमूर्तमूर्छितौ। शुक्रंतेजोरे
तसीचबीजवीर्येन्द्रियाणिच॥६२॥ मायुःपित्तंकफःश्लेष्मास्त्रियांतुत्वगसृग्धरा॥ पिशितंतरसंमांसंपललंक्र
व्यमामिषं॥६३॥ उत्तप्तंशुष्कमांसंस्यात्तद्वल्लूरंत्रिलिंगकं॥ ॥

जिनेत्तः अरसुत्रारीयतेरेतः। रीङ्स्रवणे। बीजयतेवितिबीजं। वीर्यनिर्लोकिकवीरेअच्कीवेसाधुवीर्यं। इंद्रस्यात्मनोलिंगमिति
इंद्रियं। इंद्रियमिंद्रलिंगमितिसाधुः। मिनोतिमलान्संसकचान्मायुः। पततिस्रंसतेपित्तं। कात्फलतिकफः। श्लिष्यतिश्लेष्मा।
... त्वचसंवरणे। असृग्धारयतिधरा। पिश अवयवे। तरोबलमस्त्यनरसं। तरत्यनेनकार्श्यं वा। मन्यतेमांसं। मोसन्तायितासुत्रोतिनेरु
... पाल्यतेनेनदेहःपललं। पश्चात्क्रतः पललंतिलमिश्रस्यात्पललं। पिंशितेपित्र्य... व्यतेक्रव्यं। क्रुद्धगतो आमिष्यतेआमि
षं। जांगलं च। पललंनानार्थ। उत्तप्यतेशोष्यतेउत्तप्तं। बलंलुनातिवल्लूरं॥ वल्लिसोत्रावा॥

अ.टी
५६

तुराग्द्विस्रोतांसि रुधिरं। अस्यते न स्रज्यते वा असृक्। लोहितं रक्तं वर्णान्तरं। अस्यते अस्रं। शोणति शोणितं। क्षतोऽस्य वर्णो बुक्कते
स्वाद्र बुक्काग्रमांसे बुक्का नीतः पुंस्ययं। स्त्रीत्येके। बुक्का इति केचित्। अग्रं मुख्यं। ह्रियते हृत्। नीवा धारं यस्त्रा दानं प्रकृत्यन्तरं। मेद्यति
स्निह्यति मेदः। अग्रसत्रं वा। क्लीबे। उप्यते वपा। वस्ते मांसस्थं। यः स्नेहः सा वसेति वैद्याः॥ पश्चाद्भागे ग्रीवायां कृकाटिकायां शिरा
मन्यते मन्या॥ संज्ञायां समजनिषदेति क्यप्। नडस्येयं नाडी॥ सोऽपि या इ। धमति धमनिः धमिः सौत्रः। सिनोति निकायं सिरा॥
षिञ् बन्धने। तिलति तिलकं। क्लाम्यति क्लोम उदर्यो जलाधारः। हृदयस्य दक्षिणे कृत्। क्लोम। वामे प्लीहा पुप्फुसश्चेति वैद्याः

रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितं॥६४॥ बुक्काग्रमांसं हृदयं हृन्मेदस्तु वपा वसा। पश्चाद्ग्रीवासि
रा मन्या नाडी तु धमनिः सिरा॥६५॥ तिलकं क्लोम मस्तिष्कं गोर्दं किट्टं मलोऽस्त्रियां। अन्त्रं पुरीतद्गुल्मस्तु
प्लीहा पुंस्यथ वस्नसा॥६६॥ स्नायुः स्त्रियां कालखण्डयकृती तु समे इमे। सृणिकास्यन्दिनी लाला दूषि
कानेत्रयोर्मलं॥ राम ५६

मस्तकमन्त्रा मस्तकं मिष्यति इति मस्तिकं। इषगतौ। गुध्यते गोर्दं। गुद परिवेष्टने। कटति किट्टं। किणगतौ। मलते धारयति कायं
मलः। अमत्यनेन अन्त्रं अन्त्रं पूर्यते पुरीतत्। गांतां यं। उच्यतेऽत्यतेऽमावा पिष्टं तितु गुल्मः। प्लिहति प्लीहा नान्तः। वस्तेऽच्छादयति का
यं वस्नसा। स्नसात्तु हा तु श्च। स्नायुत्पंगं स्नायुः वेष्टने। माहा स्नायु शकंधा। स्नायुसंघाता इति केचित्। दक्षिणपार्श्वस्थमांस
पिण्डः कालखण्डं। कालखण्डं नाभित्येके। यम कृत्यति यकृत्। सरति सृणि। कास्यं धते स्यन्दिनी। ललति वा लाला। दूषयत्यक्षि दूषिका।
दूषिकापि॥

मेहतं मूत्र प्रस्राव उच्चार्यते प्रयत्नेन उच्चारः। अवकीर्यते इति अवस्करः कस्येवस्करः साधुः। शाम्यति शमलं। शक्नोति अनेन शकृत्। अपि पि
र्ति पुरीषं। गूयते उत्सृज्यते गूथं। वर्च एव वर्चस्कं। विविष्यते नया विष्ठा। वेवेष्टि विट्। विशति इति सन्यः। कल्यते कर्परः कर्परो न्नाना
स्त्रिवाकुलकार्यं। कंपालयति कपालं। मूर्ध्नो अस्थिर घटादिखण्डो अस्थि उपचारात्। कीति कसति कीकसं। कुलं शरीरे साधु कुल्यं।
कोलयति संस्थापयति वा। अस्यति अस्थि। कं पालयति वा कंकालः। देहारंभको अस्थिपंजरः। करंकोऽपि। कशा रूके ति प्र

मूत्रं प्रस्राव उच्चारावस्करौ शमलं शकृत्। पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ॥६८॥ स्यात्कर्परः
कपालोऽस्त्री कीकसं कुल्यमस्थि च॥ स्याच्छरीरास्थ्नि कंकालः पृष्ठास्थ्नि तु कशेरुका॥६९॥ शिरोऽस्थनि
करोटिः स्त्री पार्श्वास्थनि तु पर्शुका॥ अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरं॥७०॥ गात्रं वपुः संहन
नं शरीरं वर्ष्म विग्रहः॥ कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः॥७१॥

शिरः कायपते इति पृष्ठस्थे ... गडु पुमान्। करोटनि करोटि। करोटी वा। पूर्यते पर्शुः पर्शुरेव पर्शुका। कण इति ... अङ्ग
यते अङ्गं। प्रत्येति प्रतीकः। अवयौति अवयवः। अपहन्यते अपघनः। अपघनोऽङ्गमिति साधुः। कल्यते कलेवरं। गाति गच्छति गात्रं
उप्यते वपुः। संहन्यते संघात्यते अस्मिन् संहननं। शीर्यते शरीरं। वृष्यते सिच्यते वर्ष्म। ... विगृह्यते विग्र
हः। ग्रहवृदृनिश्चिगमश्च इत्यप्। चीयते कायः। निवासचितिशरीरोपसमाधानेष्वादेश्च कः। दिह्यते देहः। मूर्च्छति वर्धते मूर्तिः। तन्यते
तनुः॥

अ॰टी
५७

अग्रंस्यपदस्याग्रपदं। पद्यतेऽनेनपादः पादयोर्योऽस्त्री। आयतेऽनेनपादः पदिति लक्षणयो नास्ति। यस्तु गोष्पदानस्याग्रस्थ्याप्पदमेवर
यानर्थेतिसपदन्नोमासितिपदादेशः। अग्रमपदं द्विरिनिपाथं। क्रमेणपदं। अंहस्तुनेनांघ्रिः। चर्यतेऽनेन चरणः॥ पादयोरंथी पार्ष्णिनि
घ्नतो वोटनेघुटिका। घुटपरिवर्तनेऽस्यहते गुल्फः। गुल्याधः पश्चाद्भागः पार्ष्णिः पुमानिति प्रापिकं। पर्शतस्नेहतेति पादिका
विकिलार्थ पार्ष्णिः। जंघन्यते कुटिलं गच्छति जंघा। प्रसरति प्रसृता॥ नायतेऽनानु। उर्ध्वाः पर्व्वयंथिः अस्थि विघते तत्राष्ठीव

पादाग्रं प्रपदं पादः पदंघ्रिश्चरणोऽस्त्रियां॥ तद्ग्रंथी घुटिके गुल्फौ पुमान्पार्ष्णिस्तयोरधः॥ ७२॥ जंघा तु प्रसृ
ता जानूरुपर्वाष्ठीवदस्त्रियां॥ सक्थि क्लीवे पुमानूरुस्तत्संधिः पुंसि वंक्षणः॥ ७३॥ गुदं त्वपानं पायु
र्ना वस्तिर्नाभेरधो द्वयोः॥ कटो ना श्रोणिफलकं कटिः श्रोणिः ककुद्मती॥ ७४॥ पश्चान्नितंबः स्त्रीक
ट्याः क्लीबे तु जघनं पुरः। कूपकौ तु नितंबस्थौ द्वयहीने कुकुंदरे॥ ७५॥

र्। आसंदीवदष्ठीवदिति साधुः। सजति सक्थि। उर्व्वत्यूरुः। वस्त्यधऊरुसंधिः वंक्षणं वक्षणः। गवते गूयते वानेन गुदं। अपद
रिष्टनेवा। अपानित्यनेन अपानं। पाति मलो मार्गान्पायुः। पिबति वास्नेहं। वसत्यास्मिन्मूत्रं वस्तिः मूत्रपुटकं। कध्यते आध्रियते कु
टः। शवेर्श्राणो। कलिभजे का जनांगेऽस्य श्रोकटइति। शाश्वतः कटीराणि। श्रोण्यते संहन्यते श्रोणिः। फलकमिवः ककुत्पार्ष्णि। सता
मस्त्यस्याः ककुद्मती। कट्याः पश्चाद्भागः नितंबः सुरतसमर्दान्नितंबः। स्त्रीकट्याः पुरोभागः हन्यते जघनं॥ कुत्सितं कुंदेणाति

राम
५७

स्फायतां स्फिक्। प्रयतेऽड्ड्यते प्रोथ गम्या होऽपि वक्ष्यमाणो भगशिश्नौ। भज्यते भगं। स्वलंमारः पदं वा स्विवक्ष्यात्। योतियोनिः।
स्त्री विष्कंभस्मरगृहे च। शिनोति वर्षति मेहनं शिश्नं। शेफश्च। मेहत्यनेन मेढ्रं। मुष्णाति गोपायति शुक्रं मुष्कः। अंडयोः केशोऽंडकोशः।
वर्षति शुक्रं वृषणः। पेलं च। पृष्ठास्थ्नो मध्यवंशः संघास्त्रिसंघट्टास्त्रिकं। पचत्यन्नं पिचंडः। अपिचमत्याहारं च। कुष्यते कुक्षिः। जनयत्या
हारं जठरं। उदियर्त्युदरं। उदति तुंदं। तुंदिरं। स्तनत्यनेन वालः स्तनो कूयते वा कुचौ। वक्षोरुहा हारं जवति च चुचुकं कायति पीयमानं चूचु

स्त्रियां स्फिचौ कटिप्रोथावुपस्थो वक्ष्यमाणयोः॥ भगं योनिर्द्वयोः शिश्नो मेढ्रो मेहनशेफसी॥ ७६॥ मुष्कोऽंड
कोशो वृषणः पृष्ठवंशाधरे त्रिकं। पिचंडकुक्षी जठरोदरं तुंदं स्तनौ कुचौ॥ ७७॥ चूचुकं तु कुचाग्रं स्यान्न ना
क्रोडं भुजांतरं। उरो वत्सं च वक्षश्च पृष्ठं तु चरमं तनोः॥ ७८॥ स्कंधो भुजशिरोंऽसोऽस्त्री संधी तस्यैव ज
त्रुणी। वाहुमूले उभे कक्षौ पार्श्वमस्त्री तयोरधः॥ ७९॥ मध्यमं चावलग्नं च मध्योऽस्त्री॥

कं। क्रोडं घ्नतं न पुल्लिंगं न नवति। वक्षोमध्यास्थि चास्थि क्रोडं। उरः पठिसह ह्रेते उरः। कश्वादिः वसते छादयते वत्सं। वक्षसंघातोऽस्
सुक्ष्पवेक्षः। अथा इत्येके। पृष्ठते सिच्यते पृष्ठं। देहस्य पश्चाद्भागः पृष्ठं। बाहोः पवारांश्च। सघते नारीणां स्कंधः। अस्यतेऽरणां सः।
अंसकक्षयोः संधिरूढिनाऽस्थि जायते जत्रुः। कष्यते कक्षौ। यात्रावपि। कक्ष्यौ। पश्चूनां संमूढेवपार्श्वं इति द्विवनं न्याय्यं। मध्ये न
वेमध्यमं मध्यानम्ः। अवलगत्यवलग्नमिति क्षुराश्चारो। विलग्नं वा। मन्यते मध्यम्॥ ॥

अ.टी.
५८

परौ भुजो बाहू अस्य । भुज्यतेऽनया भुजा भुजं भुज्यत्र विति साधुः । वहति वाह्यते अनेन वा बाहुः । बाल्हपन्ने । प्रवेष्टते प्रवेष्टः घनिरुद्धा लिङ्ग
दोः सान्तः । कफुणाति कफोणिः । कुरति कर्पुरः वा कूर्प बाहुसंघेः रात्रि संज्ञस्य पश्चाद्भागः तथा वा कफोणिः कूर्परो स्त्रियः । एष्ठमिति
नाममाला । अस्य कूर्परस्योर्द्धभागः प्रगाणमनेन वा प्रगण्डो उपबाहुः । कूर्पराधः प्रकोष्ठः तत्र कोष्ठः उपबाहुः प्रकोष्ठ । प्रको
ष्ठमन्तरं । विधाद् अन्तिमाणि बंधः । मणिबंधः भुजपाणिपोः संधिः । तस्माद् आरन्य कनिष्ठिकायाः करभः करेनाति
ति । आहू । निषिद्धो । ऊनोऽस्मिन् सर्वशयः शम इत्येके । नाममालायां नयपाठ । पाणिः शमः शयो हस्त इति पाणिरनेन पाणिः हस्त

द्वौ परौ द्वयोः भुजबाहू प्रवेष्टो दोः स्यात् कफोणिस्तु कूर्परः ॥ ८० ॥ अस्योपरि प्रगण्डः स्यात्प्रकोष्ठस्य चाप्यधः मणि
बंधादाकनिष्ठं करस्य करभो बहिः ॥ ८१ ॥ पंचशाखः शयः पाणिस्तर्जनी स्यात्प्रदेशिनी । अंगुल्यः करशाखा
स्युः पुंस्यंगुष्ठः प्रदेशिनी ॥ ८२ ॥ मध्यमानामिका चापि कनिष्ठा चेति ताः क्रमात् । पुनर्भवः कररुहो नखो स्त्री
नखरोऽस्त्रियां

करोनानार्थे । मणिबंधः पाणिमूले तर्जयत्यनया तर्जनी । प्रदिशत्यवश्यं प्रदेशिनी । अंगुपाणिपादं लान्त्यंगुली । अगोति अ
त्यंगुष्ठः अपि स्यु इति कः । अंगं वकाग्रमी निषत्वं । अनामिका नामग्रहणायोग्या । ब्रह्मणोऽनया शिरश्छेदनात् । अत एवास्यां प ॥ राम ५८
वित्रं क्रियते । कनिष्ठा अल्पा । अंगुष्ठाद्याः पंचांगुल्यः । नास्ति खमस्य नखः न खाणमपादितिसाधुः । नखति पाति वा नखं खं रमि
नखानखवाने वा । उरस्कः । पुनर्नवः कररुहे इत्येके पठुः । त्रिभुवनवर्णना नावः कामांकुशोपि ॥ ॥

अंगुष्ठे तर्जन्या युक्ते तते प्रसारिते अंगुष्ठे मध्यं आदिश्यते प्रादेशः । मध्यमया युक्ते अंगुष्ठेन तते तालः तलः तनिष्ठायां अनामिकया युक्ते तते
अंगुष्ठे गोकर्णः । ... ति गोकर्णः । सह कनिष्ठया तते अंगुष्ठे वितस्तिः । वितस्यतीति दिष्टिः । द्वादशांगुल इति सिद्धस्याद्युवादः । वघनं
नेन चपेटः चपेटापि । यस्तृतं तलमस्य प्रतलः प्रसृतो हस्तो । स प्रहस्तः । द्वौ प्रसृततलौ संहतौ सिंहतला स्त्र्यासिं । द्वौ हि मिलितौ
यो चपेटा न्यो हंति । संहततलो वा इत्येके । संहतं सम्बद्धं तलानीति । संकुचितो हस्तो नाव्यादिना । स्त्रियः तदिति प्रसृतः प्रसृतिः
निकुंचः इत्यपपाठः । प्रकुंच स्त्वर्द्धं प्रसृतिः । नौ युतौ प्रसृतौ पार्श्वे मिश्रो लौकिकांजलिः । अंजेर्नेनेति अंजलिः तेन अमननीति
नैसना । नन्दाद्ये द्रुपताका न्यो । उहस्ता न्यो संश्लेषादंजलिः स्मृतः । बाहो प्रसारितपाणोः हतस्तु चतुर्विंशत्यंगुलमानो । स हस्तः

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते । अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः ॥ ८४ ॥ पाणौ चपेटप्रतलप्र
हस्ता विस्तृतांगुलौ । द्वौ संहतौ सिंहतलप्रतलौ वामदक्षिणौ ॥ ८५ ॥ पाणिर्निकुब्जः प्रसृतिस्तौ युतावंजलिः
पुमान् । प्रकोष्ठे विस्तृतकरे हस्तो मुष्ट्या तु बद्धया ॥ ८६ ॥ स रत्निः स्यादरत्निस्तु निष्कनिष्ठेन मुष्टिना । व्यामो बा
ह्वोः सकरयोस्ततयोस्तिर्यगंतरं ॥ ८७ ॥ ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु ॥ ॥

वे पुंसि अर्थो वा रमतेः सिन्मला अरत्निः स हस्तो मुष्ट्या बद्धेन इत्यको । नास्ति रत्निर्विस्तृतिरस्यारत्निः निष्क्रान्ता कनिष्ठा यस्मिन्
वामुष्टिर्निष्कनिष्ठेन तेन सहस्तः अरत्निः । तिर्यगायामो व्यामः यतः बाधनेनक्षयति वा व्यामः सकरयोः पार्श्वे प्रसारितयोर्बाह्वोः तिर्यग् विस्तृतादे
पाणिः । उन्नतः प्रसार्य तन्मानमधो पौरुषं नाममाने ऊर्ध्वविस्तृतदोःपाणियत्न नृमाने पुरुषस्य दैर्घ्ये । पुरुषहाणि

[illegible]

कै॰टी
५९

चरणाति कंठेनवा कंठः। गिलति गलः। ग्रीवा ग्रसनाग्रसनगणाति वा ग्रीवा। शिरो धीयते स्यां शिरोधिः। स्कंधस्त्वति कंधरा। सैवायास्त्रस्ति तिस्र रेखा। ग्रीवा हनति ग्रीवा कंबुग्रीवा रेखात्रयो त्रिवल्या वेति। नवटस्य वतिवाऽवटुः घाटयति घाटा। कृकं शिरोग्रीवमटति कृकाटिका। ग्रीवा पश्चाद्भागः। वच्यतेऽनेन वक्त्रं। अस्यते ऽस्मिन्नास्यं। वदत्यनेन वदनं। तुंडं तुडति तुंडं। आननं अनित्यनेनाननं। लप्यतेऽनेन लपनं। खन्यतेऽनेन मुखं। घ्रायतेऽनेन घ्राणं। जिघ्रत्यनेन घ्राणं। घ्राणाति गंधवहा घोणा। नसते नासिका। नासा च नासिकेति त्रीणि।

कंठो गलोऽथ ग्रीवायां शिरोधिः कंधरेत्यपि॥ ८८॥ कंबुग्रीवा त्रिरेखा साऽवटुर्घाटा कृकाटिका। वक्त्रास्ये वदनं तुंडमाननं लपनं मुखं॥ ८९॥ क्लीबे घ्राणं गंधवहा घोणा नासा च नासिका। ओष्ठाधरौ तु रदनच्छदौ दशनवाससी। अधस्ताच्चिबुकं गंडौ कपोलौ तत्परा हनुः। रदना दशना दंता रदास्तालु तु काकुदं। रसज्ञा रसना जिह्वा प्रांतावोष्ठस्य सृक्किणी। ललाटम लिकं गोधिः ना

ल्पाम्। एषा हासिं धिनी वा। उष्यते तीव्रा। हार इत्युभयार्थोप्यधरस। इत्थं उत्तरोष्ठ वर्तते। अवनतो वाऽधरः। ओष्ठः। न्यासहि नाव धरो वा। अधरोष्ठमात्रे वर्तते। ओष्ठा व धीयते चिबुकं। द्वयसंधिः। उगाति हन्यते गंडः। कंपते कपोलः। नदधोगल्लो। तन्यधश्चाङ्गं कपोलाधः। हंत्या हरि हनुः। पुंस्यपि। रद्यते विलिख्यतेऽमीभिः रदनाः। दश्यते दस्यते वाऽमीभिः दशनाः। दंताः। रदंति विलिखंतीति रदाः। तलत्याहारोऽस्मिन् तालु। उष्कवते काकुं ददाति वा काकुदं। रस्यतेऽनया रसना। लेढि जिह्वा। लोलाच। घंटिका। प्रगोलः। शुंडिका। ओष्ठस्यांतिनो। रेकरं वनं सृजति। लालां स्रवति सृक्कणी। त्यपि क्व। चिरकांतनय। ललत्यत्रालंकारः। ललः चटुलाल्लिलकः। रत्यत्र वा ललाटं। अलत्य।

राम
५९

अमति भ्रूः। नेत्रोर्ध्वरोमराजिः। कूर्चमिति भ्रुवोर्मध्ये। तत्रालस्य दर्शनात्। एवं कूर्चं। तारयति तारका। ज्योतिषीति इव। कनीनिकस्त्रीय इति स्व वक्री। यावृच्छेदः कनीनिका। लोच्यतेऽनेन लोचनं। नीयतेऽनेन दृश्यं नयनं। नेत्रं। ईक्ष्यतेऽनेन ईक्षणं। चष्टे चक्षुः। अश्नुते व्याप्नोति अक्षि। अपि दृक्। दृष्टिः। अश्यतेऽनया दृक्। दृष्टिः स्त्रियां। अस्यते अस्रं। अस्रं च। अश्नुते अश्रु। नेत्राम्बु वाष्पो ना नार्थे। बाष्प इति शेषः। अपकृष्टा अंगादपांगो। कटं क्षिपति कटाक्षः। अपांगे न दर्शनं यत्र नेत्रांतिमागाख्यं। कीर्यते शब्दोऽस्मिन् कर्णः। शब्दस्य ग्रहोऽनेन शब्दग्रहः। श्रूयतेऽनया श्रुतिः। श्रवः। असंतः क्लीबे श्रोत्रं। शीर्यते जरसा शिरः। एवं कुमारशीर्षयोर्णिनिरिति

ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ। कूर्चमस्त्री भ्रुवोर्मध्यं तारकाक्ष्णः कनीनिका। लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी। दृग्दृष्टी चास्रु नेत्रांबु रोदनं चास्रमश्रु च॥ अपांगौ नेत्रयोरंतौ कटाक्षोऽपांगदर्शने। कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः॥ उत्तमांगं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियां। चिकुरः कुंतलो वालः कचः केशः शिरोरुहः। तद्वृंदे कैशिकं कैश्यमलकाश्चूर्णकुंतलाः॥ ९६॥

लिंगं। शीर्षं प्रकृत्यंतरं। मूर्छति मूर्द्धा पुमान्। मस्यति परिणमते मस्तकं। कं वरांगं च नानार्थे। चीयते चिकुरः। चिकुरः प्राकृते कस्य ह्रादेशात्। सम कंतीति चिकुरः। कुंतलाः मूर्द्धजा। अस्याश्चिकुराश्चिकुराः कचा इति। कुंताकारं लाति कुणाति वा। कुंतलः। बल्यते वालः। बाला दिगेवा। कचति कचः। केशो नृकेशः। शिरसि नश्रुः। काशानां समूहे। अचित्त हस्तिधेनोष्ठक्। केशा श्वागोयं केशवन्यतरस्यां। अल्यंते भूष्यंते अलकाः। चूर्णकाख्याः केशाः बर्बराख्याः कुरलाश्च॥ ॥

अ॰ ५ स्त्री ६९

चाम्पेति भ्रमरश्रेणिकृन्तयो वा॥ काकपक्षत्वयक्तः शिखेवक्ष्यते शिरसि खंड्यते वा शिखंडः॥ क्षत्रियाणां चूडा काकपक्ष इति गौडः॥ ॥ कुसुम वर्णाकंठपी॥ निकसकवरी॥ जानपद कुंडगोणेति ङीष्॥ वेषोरचना॥ संयता बद्धा कर्धं मिल्लति धम्मिल्लो॥ जटारख्यः धर्मिः सौत्रो वा॥ धर्मि ल्लइति सन्याः॥ शेते मूर्द्धि शीयते वा शिखा॥ शीडो निरक्रस्वश्च॥ चोधते चूडा॥ प्रशस्ताः केशाः केशपाशी॥ शिखेत्येवा सटश्रापयेव जटूसंघाते॥ वेणटगतौ॥ शिरसिभवः शीर्षण्यः॥ शरीरावयवाद्यत्॥ ये चतुर्द्धितुइति वा केशेषु शिरसः शीर्षेनुक चेत्युः॥ विश देश्चन्यान्या॥ संपृक्ते अविस्तृते स्नानादिनिर्मले वा॥ शल्लशातने॥ कचादित्वर्थे निर्दृशः केशपाशः केशहस्तः प्रशंसावचने श्चेतिस

तैलनाटेत्रमरकाः काकपक्षः शिखण्डकः॥ कवरी केशवेशोथ धम्मिल्लः संयताः कचाः॥ ९७॥ शिखाचूडा केशपाशी व्रतिनस्तु जटासटा॥ वेणीः प्रवेणीः शीर्षण्यशिरस्यौ विशदे कचे॥ ९८॥ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे॥ तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुंमुखे॥ ९९॥ आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनं॥ ॥

मासः॥ शिरसोऽन्यत्र रोहति रोम॥ रलयोरैक्याल्लोम लूयते वा॥ पुरुषमुखे रोम्णं वृद्धिः समश्रु लेश्मश्रु॥ इादिक्याप्यिष्यं जनं नान्या थी॥ आकल्पते आकल्पः॥ विवेष्टयंगं वेषः॥ विशति चेतसीत्येके॥ तालव्यं शमादुः॥ कर्मवशाधादित्यत्र तथा विचारी॥ नेत्र्योः पथ्यं नेपथ्यं॥ वस्त्रादिशोभा॥ प्रत्यंगं प्रतिकर्म॥ प्रसाध्यते अनेनांगं प्रसाधनं॥ पंच एकार्थाः इत्येके॥ नव्यासर्॥ नैत्रयोः पथ्यं नेपथ्यं वेषो हि वस्त्रालंकारमाल्यप्रसाधनैरंगशोभा नाम प्रसाधनं तु समालेननतिलकपत्रभंगादिना॥ राम ६९

एतेदस्समाणारो विषंताः॥ अलंकृजनिशकल्नइतीषुश्वापरिष्क्रियते॥ मिवृसंपर्वपेत्यइति वृद्धात्राजतेन ढीलोत्रा॥ जिष्णुश्चवर्द्धित वादिष्णुच्॥ अलंकारसाक्षाशोभा॥ करणोवज्नूल्सुटौ॥ मौलिनीनार्थे॥ मुखे कुधते मुकुटं॥ मंयते तेनेनवा कीर्यते किरीटं॥ कोटीरं च नाम णारिनिशेषः॥ नरनीवतरलः॥ नायकोनानार्थः॥ बालपाशेत्यादुः बालपाश्या बालबंधना र्थमुक्तावलयः पुष्पलतिकादि॥ बालेषु पाशसमूहो वा॥ परितल्लया नवापारिपथ्या॥ पार्श्वा तथा वा॥ सीमंतादिः पत्रपाशानां समूहः पत्रयाथा॥ ललाटस्यालंकारो ललाटीनेनित्रिषलंकर्त्ताऽलंकरिष्णुश्च मंडितः॥ १०॥ प्रसाधितोलंकृतश्च भूषितश्च परिष्कृतः॥ विभ्राड्भ्राजिष्णुरोचिष्णू भूषात्स्यादलंक्रिया॥ १०१॥ अलंकारस्त्वाभरणं परिष्कारो विभूषणं॥ मंडनं चाथ मुकुटं किरीटं पुंनपुंसकं॥ १०२॥ चूडामणिः शिरोरत्नं तरलो हारमध्यमः॥ वालपाश्या पारितथ्या पत्रपाश्या ललाटिका॥ १०३॥ कर्णिका तालपत्रं स्यात्कुंडलं कर्णवेष्टनं॥ ग्रैवेयकं कंठभूषा लंबनं स्याल्ललंतिका॥ १०४॥ स्वर्णैः प्रालंबिकाथोरःसूत्रिका मौक्तिकैः कृता हारो मुक्तावली देवच्छंदोसौ शतयष्टिका॥ १०५॥

टिका॥ कर्णा ललाटाकन्रु अलंकारे॥ कर्णालंकारस्तालपत्रं सो वर्णापि॥ कुंडला निरुप्त बाग्रा कुंडलं कर्णवेष्टनं॥ कर्णवेष्टन निम्नरूपावय॥ कर्णालंकार इत्येके॥ ग्रीवायामलंकारो ग्रैवेयकं॥ कुलकुक्षिग्रीवाभ्य इति ढकञ्॥ लंबत्यलंकारो ललंतिका॥ सिंहावलोकिते न सृते त्यंव॥ स्वर्णमयी कंठभूषा॥ प्रालंबिके त्येव॥ क्रियते नेन विन्नं हारः॥ देवानां छंदो निप्रायो शतयष्टिर्ल्लनासरः सरिके त्येके॥

पिशब्लनोगुच्छोगुच्छार्धादनाम्नश्चत्वारिंशल्लतोगोस्तनो लेवमानान्न। योगुच्छार्थं चतुःपञ्चाशल्लतो हूहारः। दश छन्दोदक्षिणान्त्र॥ २
अ॰टी ६२ यदाकुःचतुःचतुःषष्टिलतो हारोथाष्टहीनाय थान्तरा रश्मिः कालापो माणवको अर्द्धहारः। द्वेगुच्छकः॥ कलापच्छन्दो मन्दरश्च गुच्छकः
सप्तविंशतियष्टिकः। अन्येचारव्यन्त्र। विंशतिलतो माणवको ल्यचान्न। एकावलेतु सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैः॥
सैव एकावली॥ हस्तसूत्राख्यः। आउप्यतेऽत्रावापः। पारिवध्यते परिहास्नुवा पारिहार्यः॥ कटतिकटकः। वलतेवलयः॥ केयू
रूशीर्षयोतिकेयूरं। अंगदयतेऽङ्गदं। अंगुल्यां भवमंगुलीयं केजिह्वा मूलांगुलेछः। स्वार्थकन्न। ऊर्मिर्यस्ति रूतिमूर्मिका। अंगुल्या

हारभेदा यष्टिभेदाद्गुच्छगुच्छार्द्धगोस्तनाः॥ अर्द्धहारो माणवक एकावल्येकयष्टिका॥ सैव नक्षत्रमाला स्यात्
सप्तविंशतिमौक्तिकैः॥ आवापकः पारिहार्यः कटको वलयोऽस्त्रियां॥ १०७॥ केयूरमंगदं तुल्ये अंगुलीयकमूर्मि
का॥ साक्षरांगुलिमुद्रा स्यात्कङ्कणं करभूषणं॥ १०८॥ स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा॥ क्लीबे
सारसनं चाथ पुंस्कट्यां शृङ्खलं त्रिषु॥ १०९॥ पादांगदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियां॥ ॥

मोद्यतेऽङ्गुल्यनिवा। अंगुलिमुद्रा सा ऊर्मिका। आक्रुश्यते कंकणं स्यात्। अनिसरः। भुजंकराति के करात्। सरति वामीयते प्रक्षिप्य
तेमेखला॥ केच्यते बध्यते काञ्ची। अद्ययो नीवीव। पुंस्कट्यां सा काञ्ची सा शृङ्खला॥ शृङ्गैः स्खलतीति। पादे ऽङ्गदमिव पादांगदं तु राम ६२
ला। तुलेतेऽन्नः। बाधाः कोटिरिव तुला कोटिः। मञ्जुमधुरमीयतीति मञ्जीरः। नुवति नूपुरः। तालव्यो॥
२ सपतिसमवैतिसप्तकी। रशनिर शतीना। राशीकांतौसोत्र। सिंजिनीव। कलापो नानार्थो। सारंसनो। तिसारसनं। स्त्रीकट्यांच
स्त्रयंथनै॥ २

अ॰टी ६२ आनह्यते ऽनेनानाहः। सर्वत्र इद्दो विस्ताराख्यः॥ पटच्चरं वस्त्यस्य। सर्वेप्यादिपूर्वे केच्यः। विवितपेको नतः शत्रं। नाकृतपूर्वं चरन्नतको
नव। नक्ते काः नजते वा। आनद्वी वीडा इव। वयेन पूयते। नाच नूढाये। नमुल्यपि वस्त्रे चवनते॥ कल्पते कर्पटः। वक्ष्यते अनेनांगं वासः।
असतेऽलीबोविल्यते चेलं। चैलमित्यस्य। विलवसनो। अंशूक्तं नूकायतम्। अंशुको। ह्रोतः। सिचयः। चीरं वा। पटति विस्तीर्यते पटो। अस्त्री
तिविंतं द्वयोरदर्शनान्न। अत्रातो गंवरासिः। नापुंलिंगः। चत्वार एकार्थाः। इत्येके। अन्तरेभवमंतरीयं। गहादित्वाच्छः। उपसंवीयते

दैर्घ्यमायाममानाहः परिणाहो विशालता॥ पटच्चरं जीर्णवस्त्रं समौ नक्तककर्प्पटौ॥ १२५॥ वस्त्रमाच्छादनं वा
सश्चैलं वसनमंशुकं॥ सुचेलकः पटोऽस्त्री ना वराशिः स्थूलशाटकः॥ १२६॥ निचोलः प्रच्छदपटः समौ रल्ल
ककंबलौ॥ अंतरीयोपसंव्यानपरिधानान्यधोंऽशुके॥ १२७॥ द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा॥
संव्यानमुत्तरीयं च चोलः कूर्प्पासकोऽस्त्रियां॥ १२८॥

निनागे उपसंव्यानं। परिधीयते ऽनेनांगं प्रावारः॥ वृणोति आच्छादने इत्यन्न। उत्तरे ऊर्ध्वांगे आसज्यते उत्तरासंगः। बृहत्यप्या राम
च्छादनेकञ्च। निचोल्यते ऽनेन निचोलः। येन तूलशय्यादि प्रच्छाद्यते। चुलिः सौत्रः। चुलेल्ल्यंच। रमते ऽस्मिन्न रल्लकः। काम्य ६२
तेकंबलः। कंबलः कमनीयो भवतीति निर्वचनान्न। संवीयते ऽनेनेति संव्यानं। उत्तरे ऊर्ध्वे भवमुत्तरीयं। चोल्यते छाद्यते ऽने
न चोलः। आद्यपदी नेके। कूर्प्परे ऽस्यन कूर्प्पासः। स्त्रीणां कंचुलिकाख्यः॥ ॥

हंसवत्कायति हंसकः । अयं नरनेदस्तेषां नरतो क्कोनाहतः ॥ किंचित्क्वणतीति किंकिणी । किंकिनीत्येके ॥ क्षुद्रा त्वघंटिका क्षुद्रक
रव्या ॥ अथ हरा कतावाक्यमिदं । चगादयो वस्त्रस्य योनिरुपादानकारणं । आविष्टलिंगाः वा वाल्कं क्षौमं फालं कार्पासं बादरं कौशेयं
कवा नाहतं निःप्रवाणि तंत्रकानि वाच्यलिंगानि ॥ वल्कस्य त्वचो विकारो वाल्कं । क्षुमाया विकारः क्षौमं । आदिशब्दादंगादि फ
लस्य विकारः फालं । कोशस्येदं कौशेयं । नेत्रपट्टादि । कोशाद्दुज् । रंकुर्मृगविशेषः । कच्छादिन्यपत्यं रा । छेदः तालनं नेगा वा

हंसकः पादकटकः किंकिणी क्षुद्रघंटिका ॥११०॥ त्वक्फलकृमिरोमाणि वस्त्रयोनिर्दश त्रिषु ॥ वाल्कं क्षौ
मादि फालं तु कार्पासं बादरं च तत् ॥ कौशेयं कृमिकोशोत्थं रांकवं मृगरोमजं । अनाहतं निःप्रवाणि तंत्रकं
च नवांबरे ॥११२॥ तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगं । पत्रोर्णं धौतकौशेयं बहुमूल्यं महाधनं ॥११३॥
क्षौमं दुकूलं स्याद्द्वे तु निवीतं प्रावृतं त्रिषु । स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वर्तयोर्द्वयोः ॥११४॥

हननं । तद्रहितमनाहतं । प्रायते स्यात्प्रवाणी तंतुवायशलाका सा निर्गतास्यां निष्प्रवाणि चेति साधु । तंत्रादचिरापहृत
इति कनि तंत्रकः । उद्गम्यते अनिलस्य तेउद्गमनीयं । युगमविवाहितं । पत्रस्योर्णा गृहीत्वा उद्गमनीयवस्त्रेण । लघुत्वयदादि
पत्रोर्णं । कृमिलालोर्णा कृतं पत्रोर्णं । पृषोदरादित्वान्नः ॥ क्षुमाया विकारः क्षौमं । उह्यते क्षुमायाः आक्रुश्यते कूलं । निपीयते आच्छाद्यते
निवीतं चोक्तं संवरणं । निवृतमिति तु मुनिः । दशपते दशाः पुंसीत्येके । वस्यते यावस्त्राः वस्त्रपक्षात्क्षिप्तदशास्य वस्त्रस्याच्छादनामानार्य

निशा । र्यते शीतार्थेन नीशारः । स्यात् प्रावरणे निशेषितकं । पत्तस्यं गौरिवाक्तनीशारः प्रायेण शिशिरे हेमन्तः उर्वोरर्धं छादं
कमंशुकमर्धोरुकं । चंडमगमात निचंडातकं । यस्य चल्लनकोपत्रेशः । पादाग्रं प्रपदं आप्रपदात्प्राप्रपदं । आप्रपदं प्राप्नोति खः
वितन्यते वितानं । उपरिलोच्यते उल्लोचः । उल्लोच्यते पनीयते नेनातपादि वा । चंडकादयस्तु कदर्थोपि दूष्यते नेनान्यदर्शनं दूष्यं आ
दयाद्यात्पटकुटी । पटकुट्यगुणशालिनी स्थूला वा ॥ प्रतिसिनोति प्रतिबध्नाति प्रतिसीरा । जवंते अस्यां जवनिका । तिरस्करोति तिर

निशारः स्यात् प्रावरणे हिमानिलनिवारणे । अर्धोरुकं वरस्त्रीणां स्याच्चंडातकमंशुकं ॥११९॥ स्यात्त्रिष्वाप्रपदी
नं तत्प्राप्नोत्याप्रपदं हि यत् ॥ अस्त्री वितानमुल्लोचो दूष्याद्यं वस्त्रवेश्मनि ॥१२०॥ प्रतिसीरा जवनिका स्यात्ति
रस्करिणी च सा ॥ परिकर्मांगसंस्कारः स्यान्मार्ष्टिर्मार्जना मृजा ॥१२१॥ उद्वर्तनोत्सादने द्वे समे आप्लाव
आप्लवः । स्नानं चर्चा तु चार्चिक्यं स्थासकोथ प्रबोधनं ॥१२२॥ अनुबोधः ॥

दयति तिरस्करिणी । कांडपट रव्या ॥ कश्चित्पर्यंकिका परिकरः पर्यंकस्था वसान्थिका । अंचलं चरणकांते नीवीसासरनुद्धयः
मलापरिमार्जनार्थी क्रिया परिकर्म स्नानोद्वर्तनादि । मार्जनं मार्ष्टिः शुद्धिमात्रं । वसकिंचिदितिवा कुलकात्रितप्रापक्षद्वयविषः
जेर्वृद्धिः । मृजानिषि वादङ् । उद्वर्त्यते मलोनेनोद्वर्तनं । उद्ग्रपवारणं । उत्सादनमिति समे । स्नानं विना घृष्टिकस्नवारितिवा
रामज्जनं वा । चर्च्यते नयांगं चर्चा चर्चिकायां चर्चेन साधुश्चार्चिक्यं । चंदनादिना पुंड्रादि । निश्चत्यगस्थासकः । चर्चिक्यं चव्यतरस्थाम
